# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा - आचार्य-१, सेमेस्टर-१ | प्रश्नपत्रम् - ३ | गुणाः - ७० |
| विषयः - पुराणेतिहासः | कोड - CC-4.1.2 | समयः - ०३-०६ |
| दिनाङ्कः - ७.१२.२०१६ | ग्रन्थः - श्रीमद्भागवते पञ्चमस्कन्धः | |

---

**प्रथमान्वितिः ( युनिट - १ )**

**प्रश्नः १ कस्याप्येकस्य ससन्दर्भं व्याख्यां कुरुत ।** ०४

(१) *नायं देहो देहभाजां नृलोके ।*
*कष्टान् कामानर्हते विड्भुजां ये ।*
*तपो दिव्यं पुत्रका येन सत्त्वं*
*शुद्ध्येत् यस्माद् ब्रह्मसौख्यं त्वनन्तरम् ॥*

(२) *गुरुर्न स स्यात्स्वजनो न स स्यात्*
*पिता न स स्याज्जननी न सा स्यात् ।*
*दैवं न तत्स्यान्न पतिश्च स स्या-*
*न्न मोचयेद् यः समुपेतमृत्युम् ॥*

**प्रश्नः २ कस्यचिदेकस्य समीक्षा कार्या ।** १२

*१. भरतचरित्रं यथाधीतं समीक्षत ।*
*२. ऋषभदेवेन पुत्रेभ्यः प्रदत्तोपदेशः ।*

**प्रश्नः ३ द्वयोः संक्षेपेण उत्तरं दत्त ।** ०४

*(१) केषां स्पृहा कुटुम्बे न भवति ?*
*(२) शास्त्रैः मुक्तिद्वारं किमुक्तमस्ति ?*
*(३) दक्षादयः प्रजापतयः कस्य पुत्राः ?*

**द्वितीयान्वितिः ( युनिट - २ )**

**प्रश्नः ४ ससन्दर्भं कस्याप्येकस्य व्याख्या कार्या ।** ०४

(१) *अहं पुरा भरतो नाम राजा विमुक्तदृष्टश्रुतसङ्गबन्धः ।*
*आराधनं भगवत इहमानो मृगोऽभवं मृगसङ्गाद्धतार्थः ॥*

(२) *अहो नृजन्माखिलजन्मशोभनं*
*किं जन्मभिस्त्वपरैरप्यमुष्मिन् ।*
*न यद्धृषीकेशयशः कृतात्मनां*
*महात्मनां वः प्रचुरः समागमः ॥*

**प्रश्नः ५ कस्याप्येकस्य सारांशः लेख्यः ।** ०८

*१. रहूगणं प्रति भरतस्योपदेशः ।*
*२. भरतस्य मृगयोन्यां जन्म ।*

**प्रश्नः ६** **प्रदत्तप्रश्नेभ्यः त्रयाणाम् एकैकवाक्येन उत्तरं दत्त ।** **०३**

*(१) 'अजनाभवर्ष' इति कस्य प्राचीनं नाम ?*
*(२) महानद्यां स्नात्वा भरतः कं मन्त्रं जजाप ?*
*(३) पञ्चमस्कन्धे कति अध्यायाः ?*
*(४) ब्रह्मकुलावमानात् कः बिभेति ?*
*(५) ज्ञानेन्द्रियविषयाः कति ? के च ते ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ७** **ससन्दर्भं कस्याप्येकस्य व्याख्या कार्या ।** **०४**

(१) *स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां*
*ध्यायन्तु भूतानि शिवं मिथो धिया ।*
*मनश्च भद्रं भजतादधोक्षजे*
*आवेश्यतां नो मतिरप्यहैतुकी ॥*

(२) *यस्यास्ति भक्तिर्भगवत्य किञ्चना*
*सर्वैर्गुणैस्तत्र समासते सुराः ।*
*हरावभक्तस्य कुतो महद्गुणा*
*मनोरथेनासति धावतो बहिः ॥*

**प्रश्नः ८** **कस्याप्येकस्य वर्णनं सरलसंस्कृते कुरुत ।** **०८**

*१. भरतवंशवर्णनम् ।* *२. भारतवर्षवर्णनम् ।*

**प्रश्नः ९** **प्रदत्तेभ्यः त्रयाणां लघूत्तराणि देयानि ।** **०३**

*(१) मानवः स्वोपार्जितधनस्योपयोगं कुत्र कुर्यात् ?*
*(२) उत्तानपादपुत्रः कः ? स च कुत्र वसति ?*
*(३) भद्रश्रवा कस्य पुत्रः ?*
*(४) रसातलात् वेदान् कः आनीतवान् ?*
*(५) संकर्षणस्तुतिं कः कुरुते ?*

## चतुर्थान्वितिः ( युनिट - ४ )

**प्रश्नः १०** **कस्याप्येकस्य ससन्दर्भं व्याख्या कार्या ।** **०४**

(१) *श्रुत्वा स्थूलं तथा सूक्ष्मं रूपं भगवतो यतिः ।*
*स्थूले निर्जितमात्मानं शनैः सूक्ष्मं धियानयेदिति ॥*

(२) *स एष भगवानादिपुरुष एव साक्षान्नारायणो लोकानां स्वस्तय आत्मानं त्रयीमयॊ कर्म विशुद्धिनिमित्तं कविभिरपि च वेदेन विजिज्ञास्यमानो द्वादशधा विभज्य षट्सु वसन्तादिष्वृतुषु यथोपजोषमृतुगुणान् विदधाति ।*

**प्रश्नः ११** **कस्यचिदेकस्य वर्णनं क्रियताम् ।** **१२**

*१. नरकाणां विभिन्नगतिनां वर्णनम् ।*
*२. अतलादिलोकानां वर्णनम् ।*

**प्रश्नः १२** **द्वयोः संक्षेपेण उत्तरं यच्छत ।** **०४**

*(१) विरोचनपुत्रः अर्थात् कः ?*
*(२) भगवान् संकर्षणः कां मालां धारयति ?*
*(३) 'पुष्करम्' कस्य देवस्यासनं मन्यते ?*

=०=